The Brāhmī, International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)
Volume: 01 | Issue: 01 | Mar-May 2024 | www.thebrahmi.com

# पाणिनीयपरम्परायां त्रिमुनिव्याकरणस्य वैदग्ध्यम्

डः. सुलग्ना लेंका
अतिथि अध्यापिका, संस्कृतविभागः
कुन्तला कुमारी सावत महिला महाविद्यालयः
वालेश्वरम्

**निबन्धसारः**

संस्कृतभाषायां सत्सु वहुषु व्याकरणेषु महामुनिपाणिनिप्रणीतं व्याकरणमुच्चैस्तमां चकास्ति । तत्र शिक्षा-कल्प-छन्दः-ज्योतिष-निरुक्त-व्याकरणेति षड्स्वङ्गेषु व्याकरणं प्रधानमिति महर्षिपतञ्जलिना समाम्नातम् । षट्षु वेदाङ्गेषु व्याकरणं मुखरूपेण आदृतम् । असाधुशब्दान् परित्यज्य साधुशब्दप्रयोगनिमित्तं पदस्वरूपज्ञानाय च व्याकरणस्य प्रयोजनं विनिश्चितम् । वाक्यपदीयकारभर्त्तृहरिः व्याकरणं नित्यं, प्रमाणिकं, तपसामुत्तमतपःरूपेण शब्दानुशासने महत्स्थानमलंकरोतीति ब्रह्मकाण्डे सूचयति। सूत्रकारः पाणिनिः, वार्त्तिककारः कात्यायनः, महाभाष्यकारः पतञ्जलिः त्रिमुनिरूपेण सुविख्याताः । एतेषु "यथोत्तरं मुनीनां प्रामाण्यम्" इति न्यायेन उत्तरोत्तरशाब्दिकानां वचनं वलवत्तरं मन्यते । अत्रैव अभिनवशैल्या वैज्ञानिकरीत्या संक्षिप्ततया प्रामाणिकपद्धत्या च सूत्राणि प्रणीतानि । परवर्त्तिनिकाले नागेशभट्टः, जयादित्य,वामन प्रभृतयः आचार्याः पाणिनीयव्याकरणस्य विकाशपरम्परां वरीवर्द्धन्ति स्म ।

**कुटशब्दाः**

व्याकरणम्, पाणिनिः, त्रिमुनिः, अष्टाध्यायी, वार्त्तिकम्, महाभाष्यम्।

**उपक्रमः**

"ब्रह्म सत्यं जगत् मिथ्या" इति वचनात् जगतः मिथ्यात्वं सिद्ध्यति तद्वत् वैयाकरणविदूषां मते शब्दोऽपि समुत्पत्यनन्तरं विनाशशीलो भवति, परश्चात्र स्फोटेन शब्दानामर्थज्ञानं जायते । कोऽयं स्फोटो इति जिज्ञासायां विद्वांसः कथयन्ति- वर्णस्य पदस्य वाक्यस्य वा यस्य सहायेन सुस्पष्टार्थः स्फुटितः भवति, प्रकाशितः भवति स एव स्फोटः।अर्थवद् भवति शब्दः, शब्दो एव नित्यः।तथाहि वाक्यपदीये भर्त्तृहरिः कथयति[1]-

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ।

शब्दशास्त्रपरम्परायाः प्रमाणभूताचार्यपतञ्जलिना व्याकरणाध्ययनस्य प्रयोजनवर्णनावसरे- चत्वारि शृंगाः[2], चत्वारि वाक्[3], उतः त्व[4], सक्तूमिव[5], सुदेवोऽसि[6] इति पंचमन्त्राणां सन्निवेशः क्रियते । अतः संस्कृतवाङ्मये पदवाक्यानां विचारः शुद्धशब्दानां व्यवहारः प्रकृतिप्रत्ययानां प्रयोगः विशदतया दरीदृश्यते। अनेकेषु वैयाकरणेषु शब्द-सूत्र-लौकिक-

The Brāhmī, International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)
Volume: 01 | Issue: 01 | Mar-May 2024 | www.thebrahmi.com

शास्त्रीयशाब्दबोधनिमित्तं प्रधानतया पाणिनि-कात्यायन-पतञ्जलीति मुनित्रयविरचित-मष्टाध्यायी-वार्त्तिक-महाभाष्यमिति ग्रन्थत्रयस्य प्रामुख्यं सर्वत्र परिलक्ष्यते ।व्याकरणस्य मेरुदण्डरूपेण प्रमुखप्रामाणिकत्वेन पाणिनिः अग्रपूज्यः । तथा च-

येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।
प्रोक्तं व्याकरणं सर्वं तस्मै पाणिनये नमः ॥

अर्थात् यः पाणिनिः माहेश्वरप्रसादादेव अइउण्, ऋऌक्, इत्यादि चतुर्द्दशसूत्राणि प्रलभ्य संपूर्णव्याकरणशास्त्रस्य संपादनं कृतवान् तस्मै पाणिनये नमः । शब्दसाधुत्वसंपादनाय व्याकरणे पारिभाषिकपदानामुल्लेखो अपरिहार्यत्वात् पाणिनिना पारिभाषिकशब्दानां सन्निवेशः विहितः। सूत्रशैलीदृष्ट्या पाणिनिना सरलपद्धत्या संक्षिप्तरीत्या सूत्राणि प्रणीतानि । पुनश्च सूत्रवर्जित-कतिपयपदानां साधननिमित्तं वार्त्तिकमपि कात्यायनेन व्यधायि। सूत्रवार्त्तिकयोः सम्मिलने सूत्राणां मण्डनं पतञ्जलिना संपादितम्। तस्मादेव उत्तरोत्तरतया पतञ्जलेः मतं स्वीकार्यम् ।

**त्रिमुनिव्याकरणम्**

व्याक्रियन्ते असाधुशब्देभ्यः साधुशब्दाः पृथक्क्रियन्ते येन तत् व्याकरणमिति। प्राचीनार्वाचीनभेदेन वहवः वैयाकरणाः विद्यन्ते। तेषु आपिशलिः, काश्यपः, गार्ग्यः, गालवः, चाक्रवर्मणः, भारद्वाजः, शाकटायनः, शाकल्यः,सानकः, स्फोटायनादि दशाचार्याणां नामानि पाणिनिना स्वस्याष्टाध्याय्यामुल्लिखितानि सन्ति।केषांचित् मते इन्द्र-चन्द्र-काशकृत्स्न-आपिशली-शाकटायन-पाणिनि-अमर-जैनेन्द्रादयः अष्टौ प्राचीनवैयाकरणानां नामानि प्राचीनतया समुपलभ्यन्ते । मनुते वेदशास्त्राणि स्मृतिमनुगच्छति इति मुनिः।मुनमीनां त्रयं मुनित्रयम्। पाणिनीयव्याकरणे सूत्रकारः पाणिनिः, वार्त्तिककारः कात्यायनः, भाष्यकारः पतञ्जलिरिति त्रय एव प्रमुखं प्रमाणम्।एते महर्षयः त्रिमुनिरूपेण पाणिनिव्याकरणपरम्परायां विश्वविश्रुताः सन्ति।पाणिनिप्रणीताष्टाध्याय्याः प्रथमसूत्रं भवति- “वृद्धिरादैच्”[7] , वार्त्तिककारकात्यायनस्य प्रथमवार्त्तिकं “सिद्धे शब्दार्थसम्वन्धे”[8] इति एवञ्च पतञ्जलिकृतमहाभाष्यस्य प्रथमवचनं वर्त्तते “अथ शब्दानुशासनम् इति”[9]। मुनित्रयप्रवर्त्तितं पाणिनीयव्याकरणं स्वतः चकास्ति,भाषायाः महत्वं वर्द्धापयति च।अतः पाणिनेः सूत्रात्मकव्याकरणस्य महिमा, कात्यायनमुनेः वार्त्तिकानां गरिमा, तथा भाषासौष्ठवपरिपूर्णमहाभाष्यस्य मधुरिमा साकल्येन त्रिमुनिव्याकरणस्य महत्वं महनीयत्वं च प्रतनोति ।

**पाणिनिः**

शब्दानुशासनस्य प्रामाणिकप्रवक्ता सूत्रकर्त्ता पाणिनिरिति सर्वेषां विदुषां मतं याथार्थ्यं संगच्छते।व्याकरणस्य सूत्रनिवद्धं महदुपकारकं प्रामाणिकं साधुशब्दनिर्णायकं शास्त्रमष्टाध्यायीति । सत्सु वहुषु व्याकरणेषु संस्कृतभाषावैदूष्यलाभाय पाणिने-रष्टाध्यायीव्याकरणं मूर्धण्यं प्रतिभाति।तत्र पुरुषत्तोमदेवेन त्रिकाण्डकोषे कतिपय नामानि स्पष्टीकृतानि सन्ति।यथा- 1.पाणिनः 2.पाणिनिः 3.शालातुरीयः 4.दाक्षीपुत्रः 5.शालङ्किः 6.आहिकः 7.पाणिनेयः 8.यशस्थिलकचम्पूग्रन्थे फणिपुत्रप्रयोगश्च लक्ष्यते।महर्षिपतञ्जलिःपाणिनेः नाम दाक्षीपुत्र इति उल्लिखितवान्। पाणिनेः देशः शालतुर आसीदिति। पाणिनेः कालविषये विदुषां मतवैविध्यं परिलक्ष्यते,यथा- 1.कीथमहोदयाः -250ई.पू 2.मेक्समोलर-

The Brāhmī, International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)
Volume: 01 | Issue: 01 | Mar-May 2024 | www.thebrahmi.com

400ई.पू 3.रामकृष्णभण्डा-रकरः -650ई.पू 4.सत्यव्रतशर्मा-2350ई.पू 5.युधिष्ठिरमीमांसकः -2900 ई.पू । एते सर्वे निरुक्तकारं यास्कं पाणिनेः पूर्ववर्त्तिनिभावेन स्वीकुर्वन्ति।यथा-यस्मिन् प्रतिभाति तथा स साधकवाधकयुक्तिभिः कालं निरूपयति। पाणिनेः लिखितग्रन्थानां विवरणं यथा-1.अष्टाध्यायी 2.धातुपाठः 3.गणपाठः 4.उणादिसूत्रम् 5.लिङ्गानुशासनम् 6.पाणिनीयशिक्षा 7.जाम्ववतीविजयः(महाकाव्यम्) 8.द्विरूपकोशः इति । अष्टाध्याय्यां पाणिनिना लाघवपद्धत्या सूत्राणि संगुम्फिता, सूत्रलक्षणं भवति-

अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम् ।
अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः ।।

पाणिनिना अष्टाध्यायपरिमितानि सूत्राणि निर्मितानि।तेषां समाहारः अष्टाध्यायीति उच्यते । तेन अष्टाध्याय्यां प्रथमाध्याये संज्ञा-परिभाषा-लादेशाम्, द्वितीयाध्याये समास-कारक-विभक्तीनाम्, तृतीयाध्याये प्रत्यय-सनन्तादिधातुसंज्ञा, विकरणकृत्-तिङन्तादीनाम्, चतुर्थाध्याये स्वादि-स्त्रीप्रत्ययानाम्, पंचमे तद्धितादीनाम्, षष्ठे संप्रसारण-प्रकृतिभाव-स्वरसूत्राणाम्, सप्तमाध्याये अधिकार-आदेश-ह्रस्वविधीनाम्, अष्टमाध्याये असिद्ध-निष्ठा-रुत्व-णत्वादीनां समुपस्थापनं विहितम् ।

**कात्यायनः**

पाणिनिविरचिताष्टाध्यायीग्रन्थोपरि कात्यायनेन वार्त्तिकं विरचितम्।महाभाष्ये अनेकेषां वार्त्तिककाराणां नामानि पतञ्जलिना उच्चारितानि सन्ति, तानि यथा-1.कात्यायनः (कात्यः) 2.भारद्वाजः 3.सुनागः 4.कोष्टा 5.वाडवः 6.व्याघ्रभूतिः 7.वैयाघ्रपद्यः । तत्र वार्त्तिकलक्षणं यथा-

उक्तानुक्तदुरुक्तानां चिन्ता यत्र प्रवर्त्तते ।
तं ग्रन्थं वार्त्तिकं प्राहुर्वार्त्तिकज्ञाः मनीषिणः ।।

अर्थात् यस्मिन् ग्रन्थे उक्त-अनुक्त-दुरुक्तविषयाणां विचारः क्रियते स एव ग्रन्थः मनीषिभिः वार्त्तिकमुच्यते। कात्यपदं गोत्रापत्ययान्तम्।एतेन अवधार्यते यत्-कात्यः कात्यायनस्य मूलव्यक्तिः भवति। एषः कात्यायनः शुक्लयजुर्वेदस्थ आङ्गिरसायनस्य कात्यायनशाखायाः प्रवर्त्तकः भवति। कात्यायनशाखायाः प्रसारः विन्धस्य दक्षिणे महाराष्ट्रादि प्रदेशे जायते।महाभाष्यात् प्रतीयते[10]- कात्यायनः दाक्षिणात्य आसीत् ।

**पतञ्जलिः**

महर्षिपतञ्जलेः महाभाष्यनामधेयः ग्रन्थः व्याकरणसम्प्रदाये सुप्रसिद्धः विद्यते।पाणिनिव्याकरणपरम्परायां पाणिनिः, कात्यायनः, पतञ्जलिरिति त्रयाणां वचनमत्यन्तं प्रामाणिकं मन्यते।तथाहि-भाष्यप्रदीपे कैयटः कथयति[11]-यथोत्तरं हि मुनित्रयस्य प्रामाण्यम्।नागेशः उद्योतव्याख्याने प्रकटयति[12]- यथोत्तरं मुनीनां प्रामाण्यम्। भाष्यलक्षणम्-

सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुसारिभिः ।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः ।।

The Brāhmī, International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)
Volume: 01 | Issue: 01 | Mar-May 2024 | www.thebrahmi.com

पतञ्जलेः नामान्तराणि- गोर्नदीयः, गोणिकापुत्रः, नागनाथः, अहिपतिः, फणिभृत्, शेषराजः, शेषाहिः, चूर्णिकारः, पदकारः इति।तस्य माता नाम गोणिका अतस्तस्य नाम गोणिकापुत्र इति। भाष्यकारः पतञ्जलिः स्वस्य सोपज्ञप्रज्ञया अद्भुतेन शब्दप्रयोगद्वारा सूत्रकारनिर्दिष्टपद्धतिमनुसरन् शब्दसिद्धेः सुगमं मार्गं बोधयति। तदीयाशैली-नवनवोन्मेषशालिनी, नानाविधतर्कसमन्विता । भाष्यकारः पूर्वपक्षस्य उपस्थापनावसरे तदीयं प्रवलं तर्कं दृष्ट्वा उत्तरपक्षस्य उपस्थापनावसरे पूर्वोक्तानां कृते समीचीनं प्रत्युत्तरं यच्छति । भाष्यकारस्य वैज्ञानिकी व्याखानशैली अत्युकृष्टा भवति ।

**यथोत्तरं मुनीनां प्रामाण्यम्**

पाणिनि – कात्यायन –पतञ्जलीति मुनित्रयाणां प्रामाण्यं प्रामाणिकता वा प्रक्रमेण व्याकरणजगति सज्जीकृत विद्यते । तत्र महामुनिपाणिनिप्रणी-ताष्टाध्यायी तत्वतः साधुशब्दज्ञानाय महत् साधनं विद्यते । अत्र प्रमाणस्य भावः प्रामाण्यम्, प्रमाणं नाम प्रमीयते अनेन इति प्रमाणम् । अत्र प्र-उपसर्ग पूर्व माधातो: ल्युट् (अन) प्रत्यये प्रमाणं पदं भवति । अत्र प्रमाणशब्दस्यार्थः यथार्थज्ञानम् । व्याकरणे प्रमाणत्रयं विद्यते । शब्दप्रमाणम्, आगमप्रमाणम्, प्रत्यक्ष प्रमाणम् । अत्र त्रिमुनिरित्युक्ते पाणिनिः, कात्यायनः, पतञ्जलिरिति, अत्र आगम नाम शास्त्रं ग्रन्थो वा । अतः मुनित्रयाणां यत् शास्त्रं यथा- पाणिनेः अष्टाध्यायी, कात्यायनस्य वार्तिकम्, पतञ्जलेः महाभाष्यं, एतत्शास्त्रत्रयं आगमप्रमाणेन गृहीताः भवन्ति । अत्र शास्त्रे यत् सूत्रं भाष्यादिकं विद्यते तत् शब्दप्रमाणं कथ्यते केचन प्रमाणद्वयं स्वीकुर्वन्ति । 1. आगमप्रमाण्यम्, २.प्रत्यक्षप्रमाणम् । तत्र आगमपदेन शब्दप्रमाणं गृह्यते । यथोत्तरं नाम त्रिषु मुनिषु प्रथमप्रामाणिकः भवति पाणिनिः, अतः अष्टाध्यायी प्रथमप्रामाणिकग्रन्थः । अनन्तरं द्वितीयप्रामाणिकशास्त्ररूपेण वार्तिकं गृह्यते, तृतीयप्रामाणिकशास्त्रं भवति महाभाष्यम् । तत्र पतञ्जलिः कथयति – "शब्दप्रमाणकाः वयम्" अस्यार्थः वयं वैयाकरणाः शब्दप्रमाणमेव स्वीकुर्मः, तात्पर्यंतु वैयाकरणानां प्रमुखप्रमाणं भवति शब्द प्रमाणमिति, तेन पाणिनेः सूत्रं, कात्यायनस्य वार्तिकं, पतञ्जलेः महाभाष्यं सर्वं शब्दमयत्वात् शब्दप्रमाणरूपेण गृह्यते । शब्दसाधने प्रक्रियादशायां वा यथा सूत्रमपेक्षितम् तथैव सूत्रवर्जित कतिपयपदानां साधननिमित्तं वार्त्तिकमपि आवश्यकम् । पुनश्च सूत्रवार्तिकयोः निर्यासं ज्ञातुं पतञ्जलिकृत महाभाष्यस्य अवदानं महत्तरं विद्यते ।पतञ्जलिमते - व्याकरणस्य प्रमुखप्रमाणत्वेन पाणिनिरेव प्रमुखः प्रामाणिकः । तथाहि पाणिनीय व्याकरणं जगतीतले सर्वैः वन्दनीयम् । पतञ्जलिः कथयति-'सर्ववेदपारिषदं हीदं शास्त्रम्' अस्य अयमर्थः यत् सूत्राणि छन्दोवत् भवन्ति ।अतः छन्दस्तु वेद एव । अत: पाणिनीयसूत्राणि वेद इव प्रतिभान्ति । तस्मात् सर्वेषु व्याकरणेषु पाणिनीयव्याकरणं सर्वोत्कृष्टं सर्वोश्रेष्ठं च मन्यते ।

अत्र दृष्टान्तः - यदा अण्, इण्, प्रत्यहारेषु कस्य ' ण' कारस्य ग्रहणं भविष्यति इति शंका जगर्त्ति तदा परिभाषा विहिता – "व्याख्यानतो विशेषप्रतिपत्ति र्न हि सन्दहादलक्षणम्''[13]। 'अत्र अणुदित् सवर्णस्य चाप्रत्ययः' इति पाणिनीयसूत्रं स्वस्य महत्त्वं प्रकटयति । पुनश्च महाभाष्यकारः लण् सूत्रे भाष्ये प्रस्तौति- 'असन्दिग्धं परेण,न पूर्वेण' । यत्र अण् प्रत्ययः किम्वा इण् प्रत्ययः गृह्यते तदा अइउण् – प्रत्यहारसूत्रस्थणकारं पूर्वणकारं मत्वा तदेव गृहीतः परन्तु यत्र परस्थणकारं नीत्वा कार्यं क्रियते तदा लण् सूत्रस्थ णकारं गृह्यते ।

पुनश्च कारकप्रकरणे द्वितीयाविभक्तेः सूत्रं भवति – 'उपान्वध्याङ्वसः'[14] अत्र पाणिनिः कथयति उप , अनु ,अधि, आ पूर्वकवस्-धातोः आधारस्य कर्मसंज्ञा प्रान्पोति । तस्मात् हरिः वैकुण्ठम् उपवसति इति उदाहरणं यथार्थम् ।अत्र वार्त्तिककारकात्यायनस्य मतं भवति "अभुक्त्यर्थस्य न" अर्थात् अभुक्तार्थे यदि वस् धातोः प्रयोगः क्रियते चेत् तर्हि आधारस्य कर्मसंज्ञा न प्रान्पोति । अत्र उदाहरणम् – वने उपवसति ।

वृद्धिसंज्ञाविधायकं सूत्रं भवति-'वृद्धिरादैच्'[15]। अत्र आ,ऐ,औ काराणां वृद्धिसंज्ञा प्राप्नोति।अत्र प्रश्नः चकारस्य 'चोः कुः'[16] सूत्रेण कथं क न भवति? पतञ्जलिः कथयति-छन्दोवत् सूत्राणि भवन्ति।छन्दः नाम वेद इव।यथा वेदमन्त्रः अपरिवर्त्तनीयः तथैव 'वृद्धिरादैच्' इति सूत्रं यथा अस्ति तथा स्थास्यति, तत्र चकारस्य क न भविष्यति ।

तथा च पणिनिः अनुनासिकसंज्ञानिमित्तं सूत्रं रचयति-"मुखनासिकावचनोऽनुनासिकः"[17] अत्र मुखसहित नासिकाद्वारा उच्चारितः वर्णः अनुनासिकः भवति। अत्र कात्यायनः कथयति-शब्दो नित्यः, अतः नित्यस्य शब्दस्य कथं पुनः अनुनासिकसंज्ञा? अस्मिन् प्रसङ्गे पतञ्जलिना उच्यते- प्रक्रियादशा (शब्दसाधन)निमित्तमनुनासिकसंज्ञा आवश्यकी ।

**उपसंहारः**

शब्दानां विश्लेषणप्रक्रिया माध्यमेन ज्ञानवैशद्याय साधुशब्दानामन्वाख्यानमेव व्याकरणस्य प्राथम्यं प्रामुख्यं च स्वीक्रियते ।पाणिनीयपरम्परायां सूत्रप्रामाण्यस्य प्रमाणं भवति पाणिनिप्रणीतं सूत्रं तथा पतञ्जलिकृतं महाभाष्यं, तदर्थं भाष्यप्रामाण्याभावात् कतिपयपरिभाषाणां खण्डनं जातम् । साधुशब्दोच्चारणनिमित्तं व्याकरणस्य प्रयोजनम्, अनेन धर्मः भवति ।असाधुशब्दप्रयोगे अधर्मः भविष्यति। तथाहि भर्त्तृहरिणा[18]-

साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः ।
अविच्छेदेन शिष्टानामिदं स्मृतिनिबन्धनम् ।।

ब्रह्मा[19] वृहस्पतये प्रोवाचः, वृहस्पतिरिन्द्रायेन्द्रोभरद्वाजाय, भरद्वाज ऋषिभ्यः,ऋषयो ब्राह्मणेभ्यः । शब्दशास्त्रस्य महान् द्रष्टा महर्षिपतञ्जलिः महाभाष्ये[20] संस्कृतभाषाप्रयोगविज्ञानमित्थं प्रदर्शयति-'महान् हि शब्दस्य प्रयोगविषयः' । अर्थानां प्रकृतिः शब्दतत्वं ब्रह्म एव । संसारे सर्वोऽपि स्थितिप्रवृत्तिरूपाः व्यवहाराः शब्देनैव क्रियन्ते, तस्मात् ज्ञायते-शब्दगतव्यवहाराणां तदगतविषयाणां च मूलं शब्दात्मकं ब्रह्म एव।अतः भर्त्तृहरिणा उक्तम्[21] -

अनादिनिधनं ब्रह्म शब्दतत्वं यदक्षरम् ।
विवर्त्ततेऽर्थभावेन प्रक्रिया जगतो यतः ।।

अर्थात् शब्दतत्वं ब्रह्म, अक्षराणां वर्णानां निमित्तत्वात् अक्षरमित्युच्यते ।व्याकरणपरम्परायां शब्दार्थतत्वस्य महत्वं वहुधा स्फुटीकृतं विद्यते । निरुक्ते 'शब्दानामर्थतत्वस्य नित्यत्वं' पर्यालोचितम् । भर्त्तृहरिणा वाक्यपदीये 'शब्दार्थसम्वन्धस्य नित्यत्वं'समुपपादितम् । व्याकरणस्य परंब्रह्माधिगमत्वमपि वाक्यपदीये[22] प्रपञ्चितम्- 'तद् व्याकरणमागम्य परंब्रह्माधिगम्यते' । शब्दनित्यत्वप्रतिपादनाय महाभाष्यकारः[23] कथयति- 'नित्यपर्यायवाची सिद्धशब्दः'। अष्टाध्यायीव्याकरणे माहेश्वरवर्णसमाम्नाय संज्ञापरिभाषासहितं स्वादिसन्धीनां प्रतिपादनं जातम् ।अनन्तरं सुवन्त- अव्यय-

स्त्रीप्रत्यय-कारकविभक्ति-तद्धितप्रकरणस्य विमर्शः संक्षिप्तसूत्रशैल्या उपपादिताः । तत्र धातुपाठ-तिङन्तप्रकरण-लकारार्थप्रभृतिदशप्रक्रिया, कृदन्तप्रकरणं तथा उणादिप्रत्ययान्तशब्दानां विवरणं यथायथं सन्निवेशितं विद्यते । शाब्दिकानां सिद्धान्तदृष्ट्या अष्टाध्यायीरचनावैशिष्ट्यं व्याकरणजगति महत्तरस्थानमलंकरोति ।

**पादटीकाः**

1.वा.प.ब्र-142 2.म.भा.पस्प. 3. म.भा.पस्प. 4. म.भा.पस्प. 5. म.भा.पस्प.
6. म.भा.पस्प. 7.पा.सू-1-1-1 8.पा.सू-वा-1 9. म.भा.पस्प.1 10.म.भा-3-2-118
11.म.भा.प्र-1-1-29 12.म.भा.-3-2-118 13.प.भा.शे-1 14.पा.सू-1-4-48 15.पा.सू-1-1-1
16.पा.सू-8-2-30 17.पा.सू-1-1-8 18.वा.प.ब्र-132 19.ऋग्तन्त्रव्याकरणम्-1/4
20.म.भा.प-अ1 पा1 आ1 21. वा.प.ब्र-1 22.वा.प-1-22 23. म.भा.पस्प.

**परामृष्टग्रन्थाः**

1. अष्टाध्यायी-पाणिनिः,चौखस्वा सुरभारती प्रकाशन,2008
2. ऋग्तन्त्रम्-सूर्यकान्तहेमचम्द्रलक्ष्मणदास,दिल्ली,1970
3. काशिकावृत्तिः-वामन-जयादित्यकृत,तारा वुक् एजेन्सी,वारणासी
4. वाक्यपदीयम्-(ब्रह्मकाण्डम्)-भर्तृहरि,सत्यनारायणशास्त्री,कृष्णदास एकादमी,वारणासी,1983
5. व्याकरणमहाभाष्यम्- चौखस्वा संस्कृत प्रतिष्ठान,दिल्ली,1992
6. संस्कृत व्याकरणशास्त्र का इतिहास-रामलालकपूरट्रष्ट,वाहालगढ,सोनीपत्,हरयाणा
7. यास्कप्रणीतनिरुक्तम्- चौखस्वा सुरभारती सीरीज अफिस्, वारणासी
8. पाणिनीयशिक्षा- चौखस्वा ओरियण्टालिआ,दिल्ली